

## दशमः पाठः

# नीतिश्लोकाः

**विभक्तिपुनरावृत्तिः**

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥1॥

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् प्रियं हि वक्तव्यं वचने का दरिद्रता ॥2॥

नमन्ति फलिनो वृक्षाः नमन्ति गुणिनो जनाः।
शुष्कवृक्षाश्च मूर्खाश्च न नमन्ति कदाचन ॥3॥

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ॥4॥

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥5॥

## शब्दार्थाः



| | | |
|---|---|---|
| **उद्यमेन** | – | परिश्रम से |
| **सिध्यन्ति** | – | पूरे होते हैं/होती हैं |
| **मनोरथैः** | – | इच्छाओं से |

| | | |
|---|---|---|
| **सुप्तस्य** | – | सोये हुए का/के/की |
| **प्रविशन्ति** | – | प्रवेश करते हैं/करती हैं |
| **मृगाः** | – | अनेक पशु |
| **प्रियवाक्यप्रदानेन** | – | मधुर वाक्य बोलने से |
| **तुष्यन्ति** | – | संतुष्ट होते हैं/होती हैं |
| **वक्तव्यम्** | – | बोलना चाहिए |
| **फलिनः** | – | फलवाले |
| **गुणिनः** | – | गुणवाले |
| **शुष्कवृक्षाश्च** | – | और सूखे पेड़ |
| **कदाचन** | – | कभी भी |
| **अभिवादनशीलस्य** | – | प्रणाम करने के स्वभाव वाले का/के/की |
| **वृद्धोपसेविनः** | – | बड़ों की सेवा करने वालों का/के/की |
| **वर्धन्ते** | – | बढ़ते हैं/बढ़ती हैं |
| **यशः** | – | कीर्त्ति |
| **काव्यशास्त्रविनोदेन** | – | काव्यशास्त्र के द्वारा मनोरञ्जन से |
| **धीमताम्** | – | बुद्धिमानों का/के/की |
| **कलहेन** | – | झगड़े से |

## अभ्यासः



1. **प्रथमं चतुर्थं पञ्चमं श्लोकञ्च सस्वरं गायत।**

2. **श्लोकेषु रिक्तस्थानानि पूरयत–**

(क) नमन्ति ...................... वृक्षाः, नमन्ति ...................... जनाः।

............................. मूर्खाश्च न नमन्ति .............................॥

(ख) काव्यशास्त्रविनोदेन .................... गच्छति ....................।

.......................... मूर्खाणां निद्रया .......................... वा ॥

### 3. श्लोकांशान् योजयत–

| क | ख |
|---|---|
| उद्यमेन हि सिध्यन्ति | सर्वे तुष्यन्ति जन्तवः। |
| प्रियवाक्यप्रदानेन | वचने का दरिद्रता। |
| चत्वारि तस्य वर्धन्ते | प्रविशन्ति मुखे मृगाः। |
| तस्मात् प्रियं हि वक्तव्यं | कार्याणि न मनोरथैः। |
| नहि सुप्तस्य सिंहस्य | आयुर्विद्या यशो बलम्। |

### 4. उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षं 'न' इति लिखत–

**यथा**– उद्यमेन कार्याणि सिध्यन्ति। [आम्]

फलिनो वृक्षाः न नमन्ति। [न]

(क) प्रियवाक्यप्रदानेन सर्वे न तुष्यन्ति। [ ]

(ख) धीमतां कालः काव्यशास्त्रविनोदेन गच्छति। [ ]

(ग) अभिवादनशीलस्य आयुर्विद्या यशो बलं न वर्धन्ते। [ ]

(घ) गुणिनो जनाः नमन्ति। [ ]

(ङ) मनोरथैः कार्याणि न सिध्यन्ति। [ ]

## 5. अधोलिखितानां पदानां विभक्तिं वचनञ्च लिखत–

| | | |
|---|---|---|
| **यथा**– उद्यमेन | तृतीया | एकवचनम् |
| सिंहस्य | ...................... | ...................... |
| मृगाः | ...................... | ...................... |
| विद्या | ...................... | ...................... |
| मूर्खाणाम् | ...................... | ...................... |
| निद्रया | ...................... | ...................... |

## 6. प्रश्नानाम् उत्तराणि लिखत–

(क) कार्याणि केन सिध्यन्ति?

(ख) सर्वे जन्तवः केन तुष्यन्ति?

(ग) कस्य मुखे मृगाः नहि प्रविशन्ति?

(घ) के के नमन्ति?

(ङ) चत्वारि कस्य वर्धन्ते?

(च) धीमतां कालः कथं गच्छति?